# PRE-BOARD EXAMINATION (2023-24)
## CLASS : X
## SUBJECT : SANSKRIT (122)

**Time Allowed : 3 hours** **Maximum Marks : 80**

**समय : होरात्रयम्** **अधिकतम अंक : 80**

***सामान्यनिर्देशाः***

- *कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।*
- *उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।*
- *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
- *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
- *सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।*
- *प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।*

***प्रश्नपत्रस्वरूपम्***

| | | | |
|---|---|---|---|
| 'क' खण्डः | - | अपठित-अवबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | - | रचनात्मक-कार्यम् | 15 अङ्काः |
| 'ग' खण्डः | - | अनुप्रयुक्त-व्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | - | पठित-अवबोधनम् | 30 अङ्काः |

*************

## 'क'-खण्डः
## अपठित-अवबोधनम् ( 10 अङ्काः )

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **( 10 )**

विद्याध्ययनं समाप्य गुरुदक्षिणां दातुम् उत्सुकः कौत्सः एकदा गुरुम् उपगम्य आत्मनः इच्छां प्रकटितवान्। कौत्सस्य वचनं श्रुत्वा गुरुणा कथितम् - "तव विशुद्ध्या श्रद्धया, उत्कृष्टभावनया, परम-सेवया च नितान्तमस्मि प्रसन्नः, अतः गुरुदक्षिणां न कामये।" आचार्यस्य वचनं श्रुत्वा कौत्सः पुनरभाषत "यदि भवन्तः मम सकाशात् दक्षिणां न ग्रहीष्यन्ति, तदा मम अध्ययनं सर्वथा व्यर्थं भविष्यति इति मम विश्वासः"। एवं प्रकारेण वारं-वारम् अनुरोधेन कुपितः आचार्यः आदिष्टवान् - "त्वम् मम सकाशात् चतुर्दश विद्याः अधीतवान् अतः चतुर्दशकोटि स्वर्णमुद्राः मह्यं देहि।" आचार्यस्य वचनं श्रुत्वा कौत्सः चिन्तामग्नः अभवत्। यत् इयत्यः मुद्राः कुतः आनेयाः? कोऽपि दानी एतावत् धनं दातुं न समर्थः प्रतीयते। तस्मात् दातृणां मध्ये रघोः सकाशम् एव चलितव्यम् इति विचार्य कौत्सः रघोः समीपम् उपागच्छत्।

**अ. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् )** **(1x2=2)**

(i) गुरुदक्षिणां दातुम् क: उत्सुक:?

(ii) कौत्स: किं समाप्य गुरुम् उपागच्छत्?

(iii) वारं-वारम् अनुरोधेन क: कुपित: अभवत्?

**आ. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् )** **(2x2=4)**

(i) कौत्सस्य वचनं श्रुत्वा गुरुणा किम् कथितम्?

(ii) कुपित: आचार्य: किम् आदिष्टवान्?

(iii) आचार्यस्य वचनं श्रुत्वा कौत्सस्य मनसि का चिन्ता जाता?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **(1x1=1)**

**ई. यथानिर्देशम् उत्तरत - ( केवलं प्रश्नत्रयम् )** **(1x3=3)**

(i) ''विशुद्धया श्रद्धया'' अत्र विशेषणपदं किम्?

(क) श्रद्धया (ख) विशुद्धया

(ग) विशुद्धश्रद्धया (घ) तव

(ii) ''पार्श्वम्'' इति पदस्य किं समानार्थकपदं गद्यांशे प्रयुक्तम्?

(क) मध्ये (ख) व्यर्थं

(ग) सकाशम् (घ) सर्वथा

(iii) ''उपागच्छत्'' इति क्रियापदस्य कर्तृपदं किम्?

(क) रघो: (ख) आचार्य:

(ग) विचार्य (घ) कौत्स:

(iv) 'ग्रहीतुम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) वारं (ख) कामये

(ग) दातुं (घ) कथितम्

## 'ख'-खण्डः

### रचनात्मक-कार्यम् ( 15 अङ्काः )

**2. स्वमित्रम् संस्कृतं पठितुं प्रेरयितुं लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयित्वा पुनः लिखत - (½x10=5)**

जयपुरतः

दिनाङ्कः 15-12-2023

प्रिय दिनेशः,

(i)................

अत्र कुशलं तत्रास्तु। तव (ii)................ ज्ञातं यत् त्वम् नवमकक्षायां संस्कृतं पठितुं वाञ्छति। एतत् ज्ञात्वा अहम् अति प्रसन्नः (iii)................ यतोहि संस्कृतं पठित्वा वयं राष्ट्रगौरवम् अनुभवितुं (iv)................। इयं देवभाषा विश्वस्य सर्वासु (v)................ प्राचीनतमा वैज्ञानिकी च अस्ति। विश्वस्य (vi)................ भाषासु भारतीय भाषासु च अनेके (vii)................ शब्दाः प्राप्यन्ते। अस्माकम् अनेके (viii)................ संस्कृते एव लिखिताः सन्ति। अतः त्वं सर्वैः (ix)................ सह संस्कृतमपि पठ इति मम प्रार्थना। मातापितृभ्यां चरणयोः प्रणामान् कथय।

तव (x)................

चन्दनः

**मञ्जूषा**

| |
|---|
| शक्नुमः, विषयैः, अभवम्, मित्रम्, भाषासु, संस्कृतस्य, पत्रात्, अनेकासु, ग्रन्थाः, नमोनमः |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत- (1x5=5)**



**मञ्जूषा**

| |
|---|
| शुद्धम्, खगः वृक्षारोपणम्, वातावरणम् उपकारः, वृक्षाः, कुर्वन्ति, कर्त्तव्यं, सहायता, अधिकाधिकाः, प्रदूषणं, रोपणीया, सर्वेषां |

**अथवा**

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

"मम दिनचर्या"

**मञ्जूषा**

| |
|---|
| उत्थाय, प्रातःभ्रमणम्, पठनं, मध्याह्ने, क्रीडनाय, समयसारणीम्, स्नानं कृत्वा, प्रातः काले, प्रातराशम्, भोजनम्, प्रभु स्मरणम्, उद्यानम् |

4. **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवल वाक्यपञ्चकम्)** **(1x5=5)**

(i) अक्षित घर जाना चाहता है।

Akshit wants to go home.

(ii) राम अयोध्या से वन को गए।

Ram went to the forest from Ayodhya.

(iii) यह मेरा गांव है।

This is my Village.

(iv) माता भोजन बनाती है।

Mother Cooks food.

(v) अनुज की बहिन आई।

Anuj's sister came.

(vi) बालक सिंह से डरता है।

The Child is afraid of the lion.

(vii) पेड़ हमारे मित्र है।

Trees are our friends.

## 'ग'-खण्डः

## अनुप्रयुक्त-व्याकरणम् ( 25 अङ्काः )

**5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा कुरुत - ( केवलं प्रश्नचतुष्टयम् )** **(1x4=4)**

(i) परं **<u>वानरस्तु</u>** कूर्दित्वा वृक्षमारूढः।

(ii) **<u>करुणापरो गृही</u>** तस्मै आश्रयं प्रायच्छत्।

(iii) स केनापि प्रकारेण **<u>परैः+न</u>** परिभूयते।

(iv) **<u>केचित्+वृष्टिभिः</u>** आर्द्रयन्ति।

(v) अमुना **<u>स्यात्+नैव</u>** जनग्रसनम्।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत - ( केवलं प्रश्नचतुष्टयम् )** **(1x4=4)**

(i) परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं **<u>विमूढा धीः यस्य सः।</u>**

(क) विमूढः (ख) विमूढधीः

(ग) विमूढिः (घ) मूढधिः

(ii) **<u>वाक्पटुः</u>** धैर्यवान् मन्त्री सभायामप्यकातरः।

(क) वाचि पटुः (ख) वाचः पटुः

(ग) वाचे पटुः (घ) वाचाम् पटुः

(iii) वानरः सिंहस्य कर्णमाकृष्य पुनः **<u>वृक्षोपरि</u>** आरोहति।

(क) वृक्षेण उपरि (ख) वृक्षम् उपरि

(ग) वृक्षात् उपरि (घ) वृक्षस्य उपरि

(iv) आलस्यं हि मनुष्याणां **<u>शरीरस्थः</u>** महान् रिपुः।

(क) शरीरं स्थितः (ख) शरीरस्य स्थितः

(ग) शरीरे स्थितः (घ) शरीरात् स्थितः

(v) सुरभेरिमाम् अवस्थां दृष्ट्वा **<u>सुराणाम् अधिपः</u>** ताम् अपृच्छत् -

(क) सुरधिपः (ख) सुराधिपः

(ग) सुराधिपतिम् (घ) सुराधीः

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत - (केवलं प्रश्नचतुष्टयम्) (1x4=4)**

(i) पाषाणी **<u>सभ्यता</u>** निसर्गे स्यान्न समाविष्टा।

(क) सभ्+यता (ख) सभ्य+ता

(ग) सभ्य+तल् (घ) सभ्यता+तल्

(ii) ललितलतानां माला **<u>रमणीय+टाप्</u>**।

(क) रमणीयता (ख) रमणीया

(ग) रमणा (घ) रमणीटा

(iii) वाक्पटुः **<u>धैर्यवान्</u>** मन्त्री सभायामप्यकातरः।

(क) धैर्य+मतुप् (ख) धैर्य+वन्

(ग) धैर्य+आन् (घ) धैर्य+वान्

(iv) **<u>पाषाणी</u>** सभ्यता निसर्गे स्यान्न समाविष्टा।

(क) पाषाण+डीष् (ख) पाषाण+टाप्

(ग) पाषाण+ठक् (घ) पाषाण+ङीप्

(v) **<u>भाषा+ठक्</u>** ज्ञानं सम्यक्तया प्राप्तव्यम्।

(क) भाषिकः (ख) भाषकं

(ग) भाषायिकः (घ) भाषिकं

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत - (केवलं प्रश्नत्रयम्) (1x3=3)**

(i) कृष्णः - हे पार्थ! ............. सदा धर्मस्य पक्षे भवामि।

(क) अहं (ख) ईश्वरः

(ग) मया (घ) त्वम्

(ii) अर्जुनः- अधुना एतत् मया .............।

(क) जानामि (ख) ज्ञायते

(ग) अहम् (घ) जानीमः

(iii) कृष्णः - यदि ............. ज्ञायते तर्हि अलं चिन्तया।

(क) भवान् (ख) त्वम्

(ग) अहम् (घ) त्वया

(iv) अर्जुनः - अहं अवश्यं युद्धं ...............।

(क) करिष्यते (ख) क्रियते

(ग) करिष्यामि (घ) करोषि

**9. समुचितैः कालबोधकशब्दैः रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्) (1x4=4)**

(i) माता 9:00 ............. भोजनं निर्माति।

(ii) बालकाः 9:30 ............. भोजनं कुर्वन्ति।

(iii) अध्यापकः 10:15 ............. पाठं पाठयति।

(iv) मित्राणि 11:45 ............. क्रीडन्ति।

(v) पितामहः 4:30 ............. मिष्ठान्नं ददाति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) (1x3=3)**

(i) कियांशः ................ नृत्यं करिष्यति।

(ii) यावत् आरक्षकः आगच्छति, ................ चौरः पलायते।

(iii) ................ रविवासरः आसीत्।

(iv) बुद्धिर्बलवती तन्वि सर्वकार्येषु ................।

**मञ्जूषा**

| सर्वदा, श्वः, ह्यः, तावत् |
| --- |

11. **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (केवलं प्रश्नत्रयम्)** **(1x3=3)**

(i) हिमकरः **शीतला** भवति।

(क) शीतलम् (ख) शीतलानि

(ग) शीतलः (घ) शीतलाः

(ii) तौ फलानि **खादन्ति**।

(क) खादति (ख) खादसि

(ग) खादतः (घ) खादावः

(iii) **जलः** निर्मलम् अस्ति।

(क) जलम् (ख) जले

(ग) जलस्य (घ) जलाय

(iv) अहं श्वः पत्रं **लिखामि**।

(क) लिखामः (ख) लेखिष्यामि

(ग) लिख्यामि (घ) लिखिष्यामः

**'घ'-खण्डः**

**पठित-अवबोधनम् (30 अङ्काः)**

12. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **(5)**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अग्रह्णाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितम् आरभत - 'चौरोऽयम्, चौरोऽयम्' इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्र आगच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्।

**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(½x2=1)**

(क) कः गृहाभ्यन्तरं प्रविष्टः?

(ख) चौरः काम् आदाय पलायितः?

(ग) अतिथिः केन प्रबुद्धः?

**आ. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् )** **(1x2=2)**

(क) तत्र किं विचित्रम् अघटत?

(ख) ग्रामवासिनः कम् अभर्त्सयन्?

(ग) कः चौरः आसीत्?

**इ. यथानिर्देशम् उत्तरत - ( केवलं प्रश्नद्वयम् )** **(1x2=2)**

(क) ''पलायितः'' इति क्रियायाः कर्त्ता कः?

(ख) ''विचित्रा दैवगतिः'' इत्यत्र विशेषणपदं किम्?

(ग) ''उच्चैः'' इति पदस्य विपरीतपदं किम्?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **(5)**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

**अ. एकपदेन उत्तरत ( केवलं प्रश्नद्वयम् )** **(½x2=1)**

(क) कः प्रथमो धर्मः?

(ख) तस्मात् कं रक्षेत्?

(ग) प्राणेभ्योऽपि विशेषतः कं रक्षेत्?

**आ. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् )** **(1x2=2)**

(क) किं विदुषां वचः?

(ख) सदाचारं कथं रक्षेत्?

(ग) श्लोकानुसारेण प्रथमः धर्मः कः?

**इ. यथानिर्देशम् उत्तरत - ( केवलं प्रश्नद्वयम् )** **(1x2=2)**

(क) ''प्रथमो धर्मः'' अत्र विशेषणपदं किम्?

(ख) अन्तिमः इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(ग) ''ज्ञानिनाम्'' इति पदस्य श्लोके किं पयार्यपदं वर्तते?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - (5)**

काकः - अरे! अरे! किं जल्पसि? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते। उदाहरणस्वरूपा - 'अनृतं वदसि चेत् काकः दशेत् इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिकः - अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत् -

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।।

काकः - रे परभृत! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहं एव करुणापरः पक्षिसम्राट् काकः।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (½x2=1)**

(क) कः कृष्णवर्णः?

(ख) "अलम् अलम् अतिविकत्थनेन" कः वदति?

(ग) अनृतं वदसि चेत् कः दशेत्?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)**

(क) कः आदर्शच्छात्रः मन्यते?

(ख) पिकः किं वदति?

(ग) पिकस्य सन्ततिं कः पालयति?

**ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)**

(क) "सत्यम्" इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(ख) "काकचेष्टः विद्यार्थी" इत्यत्र विशेष्यपदं किम्?

(ग) 'मन्यते' इति क्रियापदस्य कर्तृपदं किम्?

**15. रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्) (1x4=4)**

(i) **उद्यमेन** समः बन्धुः नास्ति।

(ii) प्रजानां हिते **राज्ञः** हितं भवति।

(iii) अभियुक्तः **कृशकायः** आसीत्।

(iv) **विद्वांसः** चक्षुष्मन्तः प्रकीर्तिताः।

(v) **परेभ्यः** अहितं कर्म न कुर्यात्।

16. **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत-(1x4=4)**

श्लोकः-

भुक्ता मृणालपटली भवता निपीता-न्यम्बूनि यत्र नलिनानि निषेवितानि।

रे राजहंस! वद तस्य सरोवरस्य, कृत्येन केन भवितासि कृतोपकारः।।

**अन्वयः**- यत्र भवता (i) .......... भुक्ता, अम्बूनि निपीतानि (ii) .......... निषेवितानि। रे राजहंस! वद तस्य (iii) .......... केन कृत्येन (iv) .......... भवितासि।।

**मञ्जूषा**

| |
|---|
| कृतोपकारः, मृणालपटली, सरोवरस्य, नलिनानि |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत - (1x4=4)**

श्लोकः-

क्रोधो हि शत्रुः प्रथमो नराणां, देहास्थितो देहविनाशनाय।

यथास्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्।।

**भावार्थः**- मनुष्याणां शरीरेषु स्थितः (i) .......... एव तेषां (ii) .......... विनाशस्य प्रथमः शत्रुः अस्ति। यथा (iii) .......... स्थितः अग्निः तमेव ज्वालयति तथैव क्रोधरूपाग्निः अपि जनानाम् (iv) .......... दहति।

**मञ्जूषा**

| |
|---|
| देहानां, शरीराणि, क्रोधः, काष्ठेषु |

17. **अधोलिखितं कथांशं समुचितक्रमेण लिखत - (½x8=4)**

(i) तेन वित्तेन तत्पुत्रम् महाविद्यालये प्रवेशः दापयितुं सफलः जातः।

(ii) तत्र निवसन् अध्ययने संलग्नः समभूत्।

(iii) पिता पुत्रं द्रष्टुं प्रस्थितः।

(iv) कश्चन निर्धनः जनः वित्तमुपार्जितवान्।

(v) सः बसयानं विहाय पदातिरेव प्राचलत्।

(vi) एकदा तस्य पुत्रः रुग्णः अभवत्।

(vii) तत्तनयः छात्रावासे वसति स्म।

(viii) पुत्रस्य रुग्णतामाकर्ण्य सः व्याकुलः सञ्जातः।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नत्रयम्)** **(1x3=3)**

(i) **करी** सिंहस्य बलं वेति।

(क) सिंहः (ख) भल्लूकः

(ग) गजः (घ) सर्पः

(ii) **अनृतं** वदसि चेत् काकः दशेत्।

(क) असत्यम् (ख) लघुः

(ग) स्पष्टं (घ) वियोगः

(iii) स पिता तनुजस्य रुग्णताम् **आकर्ण्य** व्याकुलः जातः।

(क) गत्वा (ख) दृष्टवा

(ग) वदित्वा (घ) श्रुत्वा

(iv) एकेन राजहंसेन या शोभा **सरसो** भवेत् -

(क) नद्यः (ख) तडागस्य

(ग) समुद्रस्य (घ) नगरस्य